KUTTIPPURAM Sub dist.

# Silent Bells

ഫസ്റ്റ്ബെൽ – അനുബന്ധ പഠനസഹായകസാമഗ്രി

| CLASS-10 | SANSKRIT | 5-08-2020 | WORK SHEET-5 |
|---|---|---|---|

PLAY ➩

## प्रथमः पाठः आयुरारोग्यसौख्यम् ।

धन्यानामुत्तमं दाक्ष्यं
धनानामुत्तमं श्रुतम्।
लाभानां श्रेष्ठमारोग्यं
सुखानां तुष्टिरुत्तमा।।

### श्लोकं पठित्वा उत्तराणि लिखत

१.धन्यानां किम् उत्तमं ?

२.धनानां किम् उत्तमं ?

३.पदच्छेदं लिखत - तुष्टिरुत्तमा ।

४. लाभानां श्रेष्ठं किम् ?

५. सुखानां उत्तमा का ?

६.अयं श्लोकः कस्मिन् ग्रन्थात् उद्धृतः?

७.केषां तुष्टिःउत्तमा ?

### यथोचितं योजयत।

| | |
|---|---|
| धन्यानाम् | शास्त्रम्। |
| धनानाम् | स्वास्थ्यम्। |
| लाभानाम् | तृप्तिः। |
| सुखानाम् | सामर्थ्यम्। |

### श्लोकानां गद्यक्रमं पूरयतु ।

धन्यानां------उत्तमम्।------श्रुतम् उत्तमम्। लाभानां श्रेष्ठम्------।
सुखानां------उत्तमा।

### श्लोकस्य भावार्थं संस्कृतभाषायां मातृभाषायां च लिखतु

## सूचनानुसारं श्लोकस्य आस्वादनटीका लिखतु

महाभारतात् उद्धृतः श्लोकः।कृतकृत्येषु सामर्थ्यं,धनेषु कीर्तिसम्पादनं,लाभेषु स्वास्थ्यं, सुखेषु तृप्तिः च श्रेष्ठाः।सुभाषितानि मानवानां धार्मिकमूल्यानि संवर्धयितुं उपकारकानि भवन्ति। शारीरिकमानसिकविकासाय आरोग्यसंरक्षणाय च तानि प्रयोजनप्रदानि भवन्ति।

## संभाषणांशान् उपयुज्य आरोग्यविषयमधिकृत्य टिप्पणीं लिखतु-



बालिका-नमस्ते ।

वैद्यः-नमस्ते।आगच्छ....।केन हेतुना अस्वस्थ इव लक्ष्यते ?

बालिका-शरीरस्य स्वास्थ्यं नास्ति।

वैद्यः-सुखदुखयोः आयतनं शरीरमेवः।स्वस्य कर्मणः फलं स्वयमेव अनुभूयते।

बालिका-परिपाकं सम्यक् नास्ति।किं करणीयम् ?

वैद्यः-भोजनावसरे इर्ष्यादिभावनां विहाय स्वस्थःभवेत्।अनेन भुक्तानां पचनं सम्यक् भवेत्।

बालिका-तुष्टिः कथम् आप्नुयात् ?

वैद्यः-कृतकृत्येषु सामर्थं,धनेषु कीर्तिसम्पादनं,लाभेषु स्वास्थ्यं,सुखेषु तृप्तिः च आप्तव्यम्।

बालिका-अन्यस्य वैद्यस्य आवश्यकता अस्ति वा ?

वैद्यः-परिश्रमः मिताहारः च भूगतौ अश्विनीसुतौ भवतः।
जनाःएतत् द्वयम् अनुशीलयन्ति चेत् अन्यस्य वैद्यस्य आवश्यकता नास्ति।

बालिका-धन्यवादः।

## उदाहरणानुसारं समस्तपदं / एकपदं लिखत-

देहः अस्य अस्ति इति - देही
गुणः अस्य अस्ति इति ------
शूलम् अस्य अस्ति इति -------
बलम् अस्य अस्ति इति --------

## उदाहरणानुसारं विग्रहवाक्यं लिखत-

सुखदुःखे - सुखं च दुःखं च
फलमूले ------------------
धनधान्ये -------------------